रं लं वं शं षं सं ह्रौं हंसः धर्म्मस्य प्राणा इह प्राणाः । पुनः आमित्यादि धर्म्मस्य जीव इह स्थितः । पुनः आमित्यादि धर्म्मस्य सर्व्वेन्द्रियाणि । पुनः आमित्यादि धर्म्मस्य वाङ्मनश्चक्षुः-श्रोत्रघ्राणप्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । इत्यनेन जीवदानं धर्म्मप्रतिमायां एवमधर्म्मप्रतिमायां कृत्वा गायत्र्यादिसामगाने तेनैव नो चेत् सप्रणवव्याहृतिगायत्रीं पठित्वा धर्म्मस्यावाहनादि कृत्वा यथाक्रमं शुक्लकृष्ण-पुष्पाभ्यां धर्म्माधर्म्मौ संपूज्य प्रणवेन पञ्चगव्य-मुपादायाभ्युक्ष्य शुक्लपुष्पयुक्तं धर्म्मं कृष्णपुष्प-युक्तमधर्म्मं न्यतुपिष्टकृते कृत्वा नवे कुम्भे स्थापयेत् । प्राड्विवाकस्ततो देवब्राह्मणसन्निधौ धर्म्मा-वाहनादिहवनान्तं कर्म्म कृत्वा दक्षिणां दत्त्वा समस्तकप्रतिज्ञापत्रं लिखित्वा शोध्यशिरसि दद्यात् । शोध्यस्तु ओम् यदि पापविमुक्तोऽहं धर्म्मस्त्वायातु मे करं इत्युक्त्वा कुम्भात्तयोरेकं गृह्णीयात् । धर्म्मे गृहीते शुद्धः अन्यथा अशुद्धः ।" इति दिव्यतत्त्वम् ॥

धर्म्मवान् [त्] त्रि, (धर्म्मोऽस्यास्तीति । धर्म्म + मतुप् । मस्य वः ।) धर्म्मविशिष्टः । पुण्यवान् । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । १०४ । २६ ।

"जनेन धर्म्मज्ञतमेन धर्म्मवा-
नुपोपविष्टो भरतस्तदाग्रजम् ॥")

धर्म्मवासरः, पुं, (धर्म्मस्य धर्म्माचरणस्य वासरः ।) पौर्णमासी । इति त्रिकाण्डशेषः ॥

धर्म्मवाहनः, पुं, (धर्म्मं वाहयतीति । वह + णिच् + ल्युः । यद्वा, धर्म्मा इव वाहनं यस्य । धर्म्मस्य वृषरूपत्वादेव तथात्वम् ।) शिवः । इति त्रिकाण्डशेषः ॥ धर्म्मस्य याने, क्ली ॥

धर्म्मवैतंसिकः, पुं, (धर्म्मे वैतंसिक इव । आत्मनो धार्म्मिकत्वविज्ञापनाय पाखण्डिकः कपटाचारी वैडालव्रतिकः ।) पापकर्म्मणा धनमासाद्यात्मनो धार्म्मिकत्वख्यापनाय दानकर्त्ता । तत्पापफलं यथा,—

"धर्म्मवैतंसिको यस्तु पापात्मा पुरुषस्तथा ।
ददाति दानं विप्रेभ्यो लोकविश्वासकारणम् ॥
पापेन कर्म्मणा विप्रो धनं लब्ध्वा निरङ्कुशः ।
रागमोहान्वितोऽत्यन्तः कलुषीं योनिमाप्नु-
यात् ॥"

इति वह्निपुराणे स्नानविधिनामाध्यायः ॥

धर्म्मव्याधः, पुं, (धर्म्मप्रधानो व्याधः । शाकपार्थिवादिवत् मध्यपदलोपिसमासः ।) पापपुरुषविशेषः । स तु काश्मीरदेशाधिपवसुनामनृप-देहनिर्गतव्याधरूपिपापपुरुषात्मकः । तस्य राज्ञो वरेण मस्य धर्म्मव्याध इति संज्ञाभूत् । यथा,—

"ततः पुत्त्रं विवस्वन्तं श्रेष्ठं भ्रातृगतस्य च ।
अभिषिच्य स्वके राज्ये तपोवनमुपागमत् ॥
पुष्करं नाम तीर्थानां प्रवरं यत्र केशवः ।
पुण्डरीकाक्षनामा तु पूज्यते तत्परायणैः ॥
तत्र गत्वा स राजर्षिः काश्मीराधिपतिर्व्वसुः ।
अतितीव्रेण तपसा स्वशरीरमशोषयत् ॥
पुण्डरीकाक्षपारं तु स्तवं भक्त्या जपन् बुधः ।
नमस्ते पुण्डरीकाक्ष नमस्ते मधुसूदन ! ।
नमस्ते सर्व्वलोकेश ! नमस्ते तिग्मचक्रिणे ॥"

इत्यादि ।

"एवन्तु वदतस्तस्य मूर्त्तिमान् पुरुषः किल ।
निर्म्मेव देहान्नीलाभो बर्व्वरको भयङ्करः ॥
उवाच प्राञ्जलिर्भूत्वा किं करोमि नराधिप ! ॥
राजोवाच ।
कोऽसि किं कार्य्यमिह ते कस्मादागतवानसि ।
एतन्मे कथय व्याध ! एतदिच्छामि वेदितुम् ॥
व्याध उवाच ।
पूर्व्वं कलियुगे राजन् ! राजा त्वं दक्षिणापथे ।
अरण्यमागतो हन्तुं श्वापदानि विशेषतः ॥
तत्र त्वधाम्यकामेन न्मगवेषधरो मुनिः ।
इन्द्रयुम्नेन दूरे तु घातितो धरणीतले ॥
ततस्त्वया महाराज ! ब्रह्महारायणं प्रभुम् ।
संचिन्त्य द्वादशी शुद्धा त्वया राजन् ! उपोषिता ॥
गौर्द्दत्ता विधिना सद्यो न्यतोऽस्युदरमूलतः ।
अहञ्च तव देहस्थः सर्व्वं जानामि चाप्यहम् ॥
स्वर्गस्थस्यापि राजेन्द्र ! स्थितोऽहं स्वेन तेजसा ।
इदानीमादिदृष्टो तु कृते नृपतिसत्तम ! ॥
सम्भूतस्त्वं महाराज ! राज्ञः सुमनसो गृहे ।
इदानीं यत् त्वया स्तोत्रं पुण्डरीकाक्षपारगम् ॥
पठितं तत्प्रभावेण विहायाङ्गरुहाण्यहम् ।
एकीभूतः पुनर्ज्जातो व्याधरूपो नृपोत्तम ! ॥
एतत् श्रुत्वा वचो राजा परं विस्मयमागतः ।
वरेण छन्दयामास तं व्याधं राजसत्तमः ॥
राजोवाच ।
त्वारितोऽसि महाव्याध! त्वया जन्मान्तरं गतम् ।
तथा त्वं मत्प्रसादेन धर्म्मव्याधो भविष्यसि ॥"

इति वाराहे आदिकृततरत्तान्तनामाध्यायः ॥ (अपरो धार्म्मिको व्याधविशेषः । अस्य विवरणन्तु महाभारते । ३ । २०६ अध्यायमारभ्य विशेषतो द्रष्टव्यम् ॥)

धर्म्मशास्त्रं, क्ली, (धर्म्मस्य धर्म्माय वा शास्त्रम् ।) मन्वादिप्रणीतशास्त्रम् । तत्पर्य्यायः । स्मृतिः २ धर्म्मसंहिता ३ । इति हेमचन्द्रः ॥ धर्म्मशास्त्र-प्रयोजका यथा, याज्ञवल्क्ये । १ । ५-६ ।

"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसम्वर्त्ताः कात्यायनवृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥"

एते प्रधानानि अन्येऽपि सन्ति ॥ रघुनन्दन-कृतधर्म्मशास्त्राणि यथा,—

"मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये ।
प्रायश्चित्ते विवाहे च तिथौ जन्माष्टमीव्रते ॥
दुर्गोत्सवे व्यवहारतत्त्वे एकादश्यादिनिर्णये ।
तडागभवनोत्सर्गे वृषोत्सर्गत्रये व्रते ॥
प्रतिष्ठायां परीक्षायां ज्योतिषे वास्तुसंज्ञके ।
दीक्षायामाह्निके कृत्ये चैव श्रीपुरुषोत्तमे ॥
सामश्राद्धे यजुःश्राद्धे शूद्रकृत्यविचारणे ।
इत्यष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः ॥"

इति रघुनन्दनभट्टाचार्य्यः ॥

धर्म्मशीलः, त्रि, (धर्म्मे धर्म्माचरणे शीलं स्वभावो यस्य ।) धार्म्मिकः । यथा, विराटपर्व्वणि ।

"धर्म्मशीलो वदान्यश्च दृढश्च सुमहाधनः ॥"

धर्म्मसंहिता, स्त्री, (धर्म्मस्य संहिता ।) स्मृतिशास्त्रम् । इत्यमरः । १ । ६ । ६ ॥

धर्म्मसावर्णिः, पुं, (धर्म्म एव सावर्णिः सूर्य्यपुत्त्रो मनुः ।) एकादशो मनुः । अस्मिन्मन्वन्तरे धर्म्मसेतुरवतारः । वैधृत इन्द्रः । विहङ्गमकाम-गमाद्या देवाः । अरुणादयः सप्तर्षयः । सत्य-धर्म्मादयो मनुपुत्त्रा भविष्यन्ति । इति श्रीभाग-वतम् ॥ * ॥

"भविष्यधर्म्मपुत्त्रस्य सावर्णस्यान्तरं शृणु ।
विहङ्गमाः कामगमा निर्म्माणरतयस्तथा ॥
त्रिप्रकारा भविष्यन्ति एकैकस्मिंस्त्रिको गणः ।
मासर्त्तुदिवसा ये तु निर्म्माणरतयस्तु ते ॥
विहङ्गमा रात्रयोऽथ मुहूर्त्ताः कामगो गणः ।
इन्द्रो वृषाख्यो भविता तेषां प्रख्यातविक्रमः ॥
हविष्मांश्च वरिष्ठश्च आरुण्यस्तथापरः ।
निःस्वरश्चानघश्चैव इष्टिश्चान्यो महामुनिः ॥
सप्तर्षयोऽन्तरे तस्मिन्नग्नितेजाश्च सप्तमः ।
सर्व्वगुगः सुधर्म्मा च देवानीकः पुरूद्वहः ॥
हेमधन्वा दृढायुश्च विभातुस्तत्सुता नृपाः ॥"

इति मार्कण्डेयपुराणम् ॥

धर्म्मसारः, पुं, (धर्म्मस्य सारः ।) श्रेष्ठपुण्यकर्म्म । यथा । ब्रह्मोवाच ।

"धर्म्मसारमहं वक्ष्ये सङ्क्षेपाच्छृणु शङ्कर ! ।
भुक्तिमुक्तिप्रदं सूक्ष्मं सर्व्वपापविनाशनम् ॥
श्रुतं मम बलं धैर्य्यं सुखमस्तुवाडमेव च ।
शोको हरति वै बुद्धिं तस्माच्छोकं परित्यजेत् ॥
कर्म्मदेवाः कर्म्मलोकाः कर्म्मसम्बन्धिबान्धवाः ।
कर्म्माणि प्रेरयन्तीह पुरुषं सुखदुःखयोः ॥
दानमेव परो धर्म्मो दानात् सर्व्वमवाप्यते ।
दानान्मुक्तिश्च राज्यञ्च दद्याद्दानं ततो नरः ॥
एकतः क्रतवः सर्व्वे समग्रवरदक्षिणाः ।
एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥
तपसा ब्रह्मचर्य्येण यज्ञैस्त्यागेन वा पुनः ।
गतिन्तु लभते जन्तुर्ग्गत्वा संसेव यां लभेत् ॥
अश्रद्धा परमं पापं श्रद्धा पापप्रमोचिनी ।
जहाति पापं श्रद्धावान् जीर्णां त्वचमिवोरगः ॥
न पुरागतप्रयाणां नराणामिह शङ्कर ! ।
चौर्य्यैर्गतानि प्रयतन्ते श्रद्धादानवमर्थिनः ॥
दूरादतिथयो यस्य गृहमायान्त्यवारिताः ।
स गृहस्थ इति प्रोक्तः शेषास्तु गृहरक्षकाः ॥
न चिन्तयन्ति ये विष्णुं नार्च्चयन्ति च ये नराः ।
धर्म्मस्य नाशका ये च ते वै निरयगामिनः ॥
ये च होमजपस्नानदेवतार्च्चनतत्पराः ।
क्षमादयादयायुक्तास्ते नराः स्वर्गगामिनः ॥
न दाता सुखदुःखानां न च हर्त्तास्ति कश्चन ।
स्वकृतान्येव भुञ्जन्ते दुःखानि च सुखानि च ॥
धर्म्मार्थं जीवितं येषां सन्तानार्थञ्च मैथुनम् ।